SANSKRIT COPY OF THE SURYA SIDDHANTA
THE OLDEST CLASSIC ON ASTRONOMY IN INDIA.
THE ORIGINAL WAS WRITTEN IN THE 4th CENTURY
THIS IS A LATE COPY.

PANDIT JYESHTARAM MUKUNDJI BOOK-DEPÔT,

No. 353, Kalbadevi Road, Javairbag, near Ramwadi, Bombay.

पंडित जेष्ठाराम मुकुंदजी पुस्तकालय,

नं. ३५३, कालबादेवी रोड, जव्हेरबाग, नजीक रामवाडी मुंबई.

V. P. P. R. A.

Per book post.—Paid.

To

सूर्यसिद्धान्त-म्हाठ. स्पर्श. Esqr.

Yoorya Sidhant mool

Yoorya

Much MS 1 e 1875 ?

no. 112

सूर्यसिद्धान्तं मूलम:

श्लो० ५००

॥श्रीगणेशाय नमः॥श्रीसूर्याय नमः॥ अचिंत्याव्यक्तरूपाय निर्गुणाय गुणात्मने॥ समस्तजगदाधारमूर्तये
ब्रह्मणे नमः॥१॥ अल्पावशिष्टे तु कृते मयो नाम महासुरः॥ रहस्यं परमं पुण्यं जिज्ञासुर्ज्ञानमुत्तमं॥२॥
वेदांगमग्र्यमखिलं ज्योतिषां गतिकारणं॥ आराधयन्विवस्वंतं तपस्तेपे सुदुष्करं॥ तोषितस्तप
सा तेन प्रीतस्तस्मै वरार्थिने॥ ग्रहाणां चरितं प्रादान्मयाय सविता स्वयं॥ श्रीसूर्य उवाच॥ विदित
स्ते मया भावस्तपसा तोषितो ह्यहं॥ दद्यां कालाश्रयं ज्ञानं ज्योतिषां चरितं महत्॥५॥ न मे तेज
सहः कश्चिदाख्यातुं नास्ति मे क्षणः॥ मदंशः पुरुषोयं ते निःशेषं कथयिष्यति॥ इत्युक्त्वांत
र्दधे देवः समादिश्यांशमात्मनः॥ स पुमान्मयमाहेदं प्रणतं प्रांजलिस्थितं॥७॥ पुरुषो
वाच॥ शृणुष्वैकमनाः पूर्वं यदुक्तं ज्ञानमुत्तमं॥ युगे युगे महर्षीणां स्वयमेव विवस्वता॥८॥ शा
स्त्रमाद्यं तदेवेदं यत्पूर्वं प्राह भास्करः॥ युगानां परिवर्तेन कालभेदोत्र केवलः॥ भूतानामंतकृ
त्कालः कालोन्यः कलनात्मकः॥ स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्तसंज्ञकः॥१०॥ प्राणा
णादिः कथितो मूर्तस्त्रुट्याद्योमूर्तसंज्ञकः॥ षड्भिः प्राणैर्विनाडी स्यात्तत्षष्ट्या नाडिका स्मृता॥
नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितं॥ तत्त्रिंशता भवेन्मासः सावनोर्कोदयैस्तथा॥ ऐंद
वस्तिथिभिस्तद्वत्संक्रांत्या सौर उच्यते॥ मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यते॥१३॥ सुरासुराणाम
न्योन्यमहोरात्रं विपर्ययात्॥ तत्षष्टिः षड्गुणा दिव्यं वर्षमासुरमेव च॥१४॥ तद्द्वादशसहस्राणि
चतुर्युगमुदाहृतं॥ सूर्याब्दसंख्यया द्वित्रिसागरैरयुताहतैः॥ संध्यासंध्यांशसहितं विज्ञेयं
तच्चतुर्युगं॥ कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया॥१६॥ युगस्य दशमो भागश्चतुस्त्रिद्व्येक
संगुणः॥ क्रमात्कृतयुगादीनां षष्ठांशः संध्ययोः स्वकः॥ युगानां सप्ततिः सैका
मन्वंतरमिहोच्यते॥ कृताब्दसंख्यस्तस्यांते संधिः प्रोक्तो जलप्लवः॥

संधिः ससंधयस्तेमनवः कल्पेज्ञेयाचतुर्दश॥ कृतप्रमाणंकल्पादौपंचदशस्मृतः॥ इत्थंयुगसहस्रेणभू
तसंहारकारकः॥ कल्पोब्राह्ममहःप्रोक्तं शर्वरीतस्यतावती॥२०॥ परमायुःशतंतस्यतयाहोरात्रसं
ख्यया॥ आयुषोर्द्धंगतंतस्य शेषःकल्पोयमादिमः॥२१॥ कल्पादस्माच्चमनवः षड्व्यतीताःस
संधयः॥ वैवस्वतस्यचमनोर्युगानांत्रिघनोगतः॥२२॥ अष्टाविंशाद्युगादस्माद्यातमेतत्कृतं
युगं॥ अतःकालंप्रसंख्याय संख्यामेकत्रपिंडयेत्॥ ग्रहर्क्षदेवदैत्यादि सृजतोस्यचराचरं॥ कृ
ताद्रिवेदादिव्याब्दाःशतघ्नावेधसोगताः॥ पश्चाद्व्रजंतोतिजवा भक्षत्रैःसततंग्रहाः॥ जीय
मानास्तुलंबंते तुल्यमेवस्वमार्गगाः॥ प्राग्गतित्वमतस्तेषां भगणैःप्रत्यहंगतिः॥ परिणाह
वशाद्भिन्नातद्वशाद्भानिभुंजते॥२६॥ शीघ्रगस्तान्यथाल्पेनकालेनमहतोल्पगः॥ तेषांतु
परिवर्तेनपौष्णांतोभगणःस्मृतः॥ विकलानांकलाषष्ट्यातत्षष्ट्याभागउच्यते॥ तत्त्रिंशताभ
वेद्राशिर्भगणोद्वादशैवते॥ युगेसूर्यज्ञशुक्राणांखचतुष्केतुरदार्णवाः॥ कुजार्किगुरुशीघ्राणां
भगणाःपूर्वयायिनां॥ इंदोरसाग्नित्रित्रीषुसप्तभूधरमार्गणाः॥ दस्त्रत्र्यष्टरसांकाक्षिलोच
नानिकुजस्यतु॥३०॥ बुधशीघ्रस्यशून्यर्तुखाद्रित्र्यंकनगेंदवः॥ बृहस्पतेःखदस्राक्षिवेद
षड्वह्नयस्तथा॥ सितशीघ्रस्यषट्सप्तत्रियमाश्विखभूधराः॥ शनेर्भुजंगषट्पंचरसवेद
निशाकराः॥ चंद्रोच्चस्याग्निशून्याश्विवसुसर्पार्णवाः युगे॥ वामंपातस्यवस्वग्नियमाश्वि
शिखिदस्त्रकाः॥३३॥ उदयादुदयंभानोर्भूमिसावनवासराः॥ वसुद्व्यष्टाद्रिरूपांकसप्ता
द्रितिथयोयुगे॥ भानामष्टाक्षिवस्वक्षित्रिद्विद्व्यष्टशरेंदवः॥ चंद्राःखचाष्टखव्योमखाग्नि
खर्तुनिशाकराः॥ षड्वह्नित्रिहुताशांककतिथयश्चाधिमासकाः॥ तिथिक्षयायमार्थाक्षि द्व्यष्ट
व्योमशराश्विनः॥३६॥ भोदया भगणैः स्वैःस्वैरूनास्स्वस्योदयायुगे॥ भवंति
भोदया भानुभगणैरूनितक्वहाः॥३७॥

+ प्रयांते शशिनोमासाः सूर्येन्दू युगणा गताः॥ रविमासोनितास्ते तु शेषाः स्युरधिमासकाः॥ (प्र॰ ॥३॥)

ख चतुष्क समुद्राष्ट कुपंच रविमासकाः॥ सावनाह्यानि चांद्रेभ्यो द्युभ्यः प्रोझ्याति थिक्षयाः॥३९॥ अधि
मासोनरात्र्यार्क्ष चांद्र सावनवासराः॥ एते सहस्त्रगुणिताः कल्पे स्युर्भगणादयः॥४०॥ प्राग्गतेः सू
र्यमंदस्य कल्पे सप्ताष्ट वन्हयः॥ कौजस्य वेद खयमाः बौधस्याष्टर्तु वन्हयः॥ खखरंध्राणि जीव
स्य शुक्रस्यार्थगुणेषवः॥ गोग्नयः शनिमंदस्य पातानामथ वामतः॥ मनुदस्रास्तु कौजस्य बौध
स्याष्टाष्ट सागराः॥ कृताद्रिचंद्रा जैवस्य त्रिखांकाश्च भृगोस्तथा॥ शनिपातस्य भगणाः कल्पेय
मरसर्तवः॥ भगणाः पूर्वमेवात्र प्रोक्ताश्चंद्रोच्चपातयोः॥४४॥ षण्मनूनां तु संपीड्य कालं तत्संधि
भिः सह॥ कल्पादिसंधिना सार्द्धं वैवस्वतमनोस्तथा॥ युगानां त्रिघनं यातं तथा कृतयुगं त्विदं॥
प्रोह्य सृष्टेस्ततः कालं पूर्वोक्तं दिव्यसंख्यया॥ सूर्याब्द संख्यया ज्ञेयाः कृतस्यांते गता अमी॥ ख
चतुष्क यमाद्यग्नि शररंध्रनिशाकराः॥४७॥ अत ऊर्ध्वममी युक्ता गतकालाब्द संख्यया॥ मा
सीकृता युता मासै र्मधुशुक्लादिभिर्गतैः॥ पृथक्स्थास्तेधिमासघ्नाः सूर्यमासविभाजिताः॥
लब्धाधिमासकैर्युक्ता दिनीकृत्य दिनान्विताः॥ द्विस्थास्तिथिक्षयाभ्यस्ताश्चांद्रवासरभाजिताः॥
लब्धोनरात्ररहिता लंकायामर्द्धरात्रिकाः॥ सावनो द्युगणः सूर्याद्दिनमासाब्दपास्ततः॥ स
प्तभिः क्षपितः शेषः सूर्याद्यो वासरेश्वरः॥५१॥ मासाब्ददिनसंख्याप्तं द्वित्रिघ्नं रूपसंयुतं॥ स
प्तोद्धृतावशेषौ तु विज्ञेयौ मास [struck] वर्षपौ॥ यथास्वं भगणाभ्यस्तो दिनराशिः कुवासरैः॥ विभा
जितो मध्यगत्या भगणादिर्ग्रहो भवेत्॥ एवंच शीघ्रमंदोच्चा ये प्रोक्ताः पूर्वयायिनः॥ विलोमग
तयः पातास्तद्वच्चक्राद्विशोधिताः॥ द्वादशघ्नाः गुरोर्याता भगणा वर्तमानकैः॥ राशिभिः सहिताः
शुद्धाः षष्ट्या स्युर्विजयादयः॥ विस्तारेणैवतदुदितं संक्षेपाद्व्यवहारिकं॥ मध्यमानयनं कार्यं

[illegible] ॥३॥

अस्मिन्कृतयुगस्यांते सर्वे मध्यगताग्रहाः ॥ विना तु पातमंदोच्चान्मेषादौ तुल्यतां गताः ॥५७॥ योज
नानि शतान्यष्टौ भूकर्णो द्विगुणानि च तु ॥ तद्वर्गतो दशगुणात्पदं भूपरिधिर्भवेत् ॥५८॥ लंबज्या
घ्नस्त्रिजीवाप्तः स्फुटो भूपरिधिः स्वकः ॥ तेन देशांतराभ्यस्ता ग्रहभुक्तिर्विभाजिता ॥ कलादि
तत्फलं प्राच्यां ग्रहेभ्यः परिशोधयेत् ॥ रेखाप्रतीचीसंस्थाने प्रक्षिपेत्स्युः स्वदेशजाः ॥ राक्षसा
लयदेवौकः शैलयोर्मध्यसूत्रगाः ॥ रोहितकमवंतीं च यथा संनिहितं सरः ॥ अतीत्योन्मीलना
दिंदोर्दिक्सिद्धिर्गणितागतात् ॥ यदा भवेत्तदा प्राच्यां संस्थानं मध्यतो भवेत् ॥६२॥ अप्राप्य वा
भवेत्पश्चादेवं चापि निमीलनात् ॥ तयोरंतरनाडीभिर्हन्याद्भूपरिधिः ॥६३॥ षष्ट्या विभज्य लब्धैस्तु
योजनैः प्रागथापरैः ॥ स्वदेशपरिधौ ज्ञेयः कुर्याद्देशांतरं हि तैः ॥ वारप्रवृत्तिः प्राग्देशे क्षपार्द्धेऽ
भ्यधिके भवेत् ॥ तद्देशांतरनाडीभिः पश्चादूने विनिर्दिशेत् ॥ इष्टनाडिगुणा भुक्तिः षष्ट्या भक्तो
कलादिकं ॥ गते शोध्यं युतं गम्ये कृत्वा तात्कालिकं भवेत् ॥ भचक्रलिप्ताशीत्यंशः परमं दक्षि
णोत्तरं ॥ विक्षिप्यते स्वपातेन स्वक्रांत्यंतादनुष्णगुः ॥ तन्नवांशं द्विगुणितं जीवस्त्रिगुणितं कुजः ॥
बुधभुक्रार्कजाः पातैर्विक्षिप्यंते चतुर्गुणं ॥ एवं त्रिघनरंध्रार्कौऽर्को रसार्कौ कीदशाहताः ॥
चंद्रादीनां क्रमादेता मध्यविक्षेपलिप्तिकाः ॥६९॥ इति श्रीसूर्यमयसंवादे श्रीसूर्यसिद्धांतर
हस्ये मध्यमाधिकारः ॥१॥ अदृश्यरूपाः कालस्य मूर्तयो भगणाश्रिताः ॥ शीघ्रमंदोच्चपाता
ख्याः ग्रहाणां गतिहेतवः ॥ तद्वातरश्मिभिर्बद्धास्तैः सव्येतरपाणिभिः ॥ प्राक्पश्चादपकृ
ष्यंते यथासन्नं स्वदिङ्मुखं ॥ प्रवहाख्यो मरुत्तांस्तु स्वोच्चाभिमुखमीरयेत् ॥ पूर्वापरापकृष्टा
स्ते गतिं यांति पृथग्विधां ॥ ग्रहात्प्राग्भगणार्द्धस्थः प्राङ्मुखं कर्षति ग्र
हं ॥ उच्चसंज्ञोऽपरार्द्धस्थस्तद्वत्पश्चान्मुखं ग्रहं ॥५॥

\+ मकरादौ शशांकोच्चंतसातस्युस्तु तुलादिकः ॥ निरंशा हंगताश्चान्ये नोक्ता ये
ऽमंदचारिणः ॥ प० १

स्वोच्चापकृष्टा भगणैः प्राङ्मुखं यांति यद्ग्रहाः॥ तत्तेषु धनमित्युक्तं मृणं पश्चान्मुखेषु तु॥५॥ दक्षिणो
त्तरतोप्येवं पातो राहुः स्वरंहसा॥ विक्षेपयत्येष विक्षेपं चंद्रादीनामपक्रमात्॥ उत्तराभिमुखं
पातो विक्षिपत्यपरार्द्धगः॥ ग्रहं प्राग्भगणार्द्धस्थो याम्यायामपकर्षति॥ बुधभार्गवयोः शीघ्रा
त्तद्वत्पातो यदा स्थितः॥ तच्छीघ्राकर्षणात्तौ तु विक्षिप्येते यथोक्तवत्॥ महत्वान्मंडलस्या
र्कः स्वल्पमेवापकृष्यते॥ मंडलाल्पतया चंद्रस्ततो बह्वपकृष्यते॥९॥ भौमादयोल्पमूर्ति
त्वाच्छीघ्रमंदोच्चसंज्ञकैः॥ दैवतैरपकृष्यंते सुदूरमतिवेगतः॥१०॥ अतो धनर्णं सुमहत्ते
षां गतिवशाद्भवेत्॥ आकृष्यमाणास्तैरेवं व्योम्नि यांत्यनिलाहताः॥ वक्रानुवक्रा कुटिला
मंदा मंदतरा समा॥ तथा शीघ्रतरा शीघ्रा ग्रहाणामष्टधा गतिः॥ तत्रातिशीघ्रा शीघ्राख्या मं
दा मंदतरा समाः॥ ऋज्वी पंचविधा ज्ञेया या वक्रा सानुवक्रगा॥ तत्तद्गतिवशान्नित्यं य
था दृक्तुल्यतां ग्रहाः॥ प्रयांति तत्प्रवक्ष्यामि स्फुटीकरणमादरात्॥१४॥ राशिलिप्ताष्टमो
भागः प्रथमं ज्यार्द्धमुच्यते॥ तत्तद्विभक्तलब्धोनमिश्रितं तद्द्वितीयकं॥ आद्येनैवं क्रमा
त्पिंडान्भक्त्वा लब्धोनसंयुताः॥ खंडकाः स्युश्चतुर्विंश ज्यार्द्धपिंडाः क्रमादमी॥ तत्त्वाश्विनो
ंकाब्धिकृता रूपभूमिधरर्तवः॥ खांकाष्टौ पंच शून्येशा बाणरूपगुणेंदवः॥१७॥ शून्य
लोचनपंचैकाश्छिद्ररूपमुनींदवः॥ वियच्चंद्रातिधृतयो गुणरंध्रांबराश्विनः॥१८॥ मुनि
षड्यमनेत्राणि चंद्राग्निकृतदस्रकाः॥ पंचाष्टविषयाक्षीणि कुंजराश्विनगाश्विनः
॥ रंध्रपंचाष्टकयमा वस्वद्र्यंकयमास्तथा॥ कृताष्टशून्यज्वलना नगाद्रिशशिवह्नयः॥२०॥

स्फुटगत्यादि चक्रमज्यार्द्ध पिंडकाः॥ ३२॥

[illegible]

मुनयो रंध्रयमला रसषट्का मुनीश्वराः॥ द्व्यष्टैका रूपषड्दस्रा सागरार्थहुताशनाः॥ खर्तुवेदा
नवाद्र्यर्था दिग्नगास्त्र्यर्थकुंजराः॥ नगांबरवियच्चंद्रा रूपभूधरशंकराः॥२४॥ शरार्णव
हुताशैका भुजंगाक्षिशरेंदवः॥ नवरूपमहीध्रैका गजैकांकनिशाकराः॥ गुणाश्विरूप
नेत्राणि पावकाग्निगुणाश्विनः॥ वस्वर्णवार्थयमलास्तुरंगर्तुगौ[illegible]श्विनः॥ नवाष्टनव
नेत्राणि पावकैकयमाग्नयः॥ अष्टाग्निसागरगुणाः उत्क्रमज्यार्द्धपिंडकाः॥ परमापक्रम
ज्या तु सप्तरंध्रगुणेंदवः॥ तद्गुणज्या त्रिजीवाप्ता तच्चापं क्रांतिरुच्यते॥ ग्रहं संशोध्य मंदो
च्चात्तथा शीघ्राद्विशोध्य च॥ शेषं केंद्रपदे तस्माद्भुजज्या कोटिरेव च॥२९॥ गताद्भुजज्या
विषमे गम्यात्कोटिः पदे भवेत्॥ युग्मे तु गम्याद्बाहुज्या कोटिज्या तु गताद्भवेत्॥ लिप्तातत्व
यमैर्भक्ता लब्धं ज्यापिंडकं गतं॥ गतगम्यांतराभ्यस्तं विभजेत्तत्वलोचनैः॥ तदवाप्तफलं
योज्यं ज्यापिंडे गतसंज्ञके॥ स्यात्क्रमज्याविधिश्चायमुत्क्रम[illegible]ज्यास्वपि स्मृतः॥ ज्यां प्रो
ज्यां प्रोह्य शेषं तत्वाश्विहतं तद्विवरोद्धृतं॥ संख्यातत्वाश्विसंवर्गे संयोज्यं धनुरुच्यते॥३३॥
रवेर्मंदपरिध्यंशा मनवः शीतगोः रदाः॥ युग्मांते विषमांते च नखलिप्तोनितास्तयोः॥ युग्मांतेर्थाद्रयः
खाग्निसुराः सूर्या नवार्णवाः॥ ओजे द्व्यगा वसुयमा रदा रुद्रा गजाब्धयः॥ कुजादीनामतः शीघ्रा
युग्मांतेऽर्थाग्निदस्रकाः॥ गुणाग्निचंद्राः खनगा द्विरसाक्षीणि गोग्नयः॥ ओजांते द्वित्रियमला द्वि
विश्वे यमपर्वताः॥ खर्तुदस्रा वियद्वेदाः शीघ्रकर्मणि कीर्तिताः॥३८॥ ओजयुग्मांतरगुणा भुज
ज्यात्रिज्ययोद्धृताः॥ युग्मवृत्ते धनर्णं स्यादोजादूनेऽधिके स्फुटाः॥ तद्गुणे भुजकोटिज्ये भ

[illegible]

शीघ्रं कोटिफलं केंद्रे मकरादौ धनं स्मृतं॥ संशोध्यं तु त्रिजीवायां कर्क्यादौ कोटिजं फलं॥४१॥ त
द्बाहुफलवर्गैक्यान्मूलं कर्णश्चलाभिधः॥ त्रिज्याभ्यस्तं भुजफलं चलकर्णविभाजितं॥
लब्धस्य चापं लिप्तादि फलं शीघ्रमिदं स्मृतं॥ एतदाद्ये कुजादीनां चतुर्थे चैव कर्मणि॥४२॥
मांदं कर्मैकमर्केंद्वोर्भौमादीनामथोच्यते॥ शीघ्रं मांदं पुनर्मांदं शीघ्रं चत्वार्यनुक्रमात्॥४३॥
अजादिकेंद्रे सर्वेषां मांदे शीघ्रे च कर्मणि॥ धनं ग्रहाणां लिप्तादि। तुलादावृणमेव च॥४४॥
अर्कबाहुफलाभ्यस्ता ग्रहभुक्तिर्विभाजिता॥ भचक्रलिप्तिका[illegible]भिस्तु लिप्ताः कार्या ग्रहेऽर्क
वत्॥ मध्ये शीघ्रफलस्यार्द्धं मांदमर्द्धफलं तथा॥ मध्यग्रहे मांदफलं सकलं शीघ्रमेव च॥
ग्रहभुक्तेः फलं कार्यं ग्रहवन्मांदकर्मणि॥ दोर्ज्यांतरगुणा भुक्तिस्तत्त्वनेत्रोद्धृता पुनः॥४६॥
स्वमंदभुक्तिसंशुद्धा मध्यभुक्तेर्निशापतेः॥ दोर्ज्यांतरादिकं कृत्वा भुक्तावृणधनं भवेत्॥४७॥
स्वमंदपरिधिक्षुण्णा भगणांशोद्धृताः कलाः॥ कर्क्यादौ तु धनं तत्र मकरादावृणं स्मृतं॥४८॥
मंदस्फुटीकृता भुक्तिः प्रोह्य शीघ्रोच्चभुक्तितः॥ तच्छेषं विवरेणाथ हन्यात्त्रिज्यांत्यकर्ण
योः॥ चलकर्णहृतं भुक्तौ कर्णे त्रिज्याधिके धनं॥ ऋणमूनेऽधिके प्रोह्य शेषं वक्रगतिर्भवे
त्॥ दूरस्थितः स्वशीघ्रोच्चाद्ग्रहः शिथिलरश्मिभिः॥ सव्येतराकृष्टतनुर्भवेद्वक्रगतिर्ग्रहः॥ शिग्रहः॥५१॥
महत्वाच्छीघ्रपरिधेः सप्तमे भृगुभूसुतौ॥ अष्टमे जीवशशिजौ नवमे तु शनैश्चरः॥५२॥
कृतर्तुचंद्रैर्वेदेंद्रैः शून्यत्र्येकैर्गुणाष्टिभिः॥ शररुद्रैश्चतुर्थेषु केंद्रांशैर्भूसुताद
यः॥ भवंति वक्रिणस्तैस्तु स्वैः स्वैश्चक्राद्विशोधितैः॥ अवशिष्टांशतुल्यैः स्वैः केंद्रैरुज्झंति

कुजार्किगुरुपातानां ग्रहवच्छीघ्रजं फलं॥ वामं तृतीयकं मांदं बुधभार्गवयोः फलं॥ स्वपातोनाद्ग्रहा
ज्जीवा शीघ्रा भृगुजसौम्ययोः॥ विक्षेपघ्नांत्यकर्णाप्ता विक्षेपाः त्रिज्यया विधोः॥५७॥ वि
क्षेपापक्रमैकत्वे क्रांतिर्विक्षेपसंयुता॥ दिग्भेदे वियुता स्पष्टा भास्करस्य यथागता॥५८॥ ग्र
होदयप्राणहताः खखैकाष्टैकोद्धृता गतिः॥ चक्रासवो लब्धयुताः स्वाहोरात्रासवः स्मृताः॥
क्रांतिः क्रमोत्क्रमज्ये द्वे कृत्वा तत्रोत्क्रमज्यया॥ हीना त्रिज्या दिनव्यासदलं तद्दक्षिणोत्तरं॥
क्रांतिज्या विषुवद्भाघ्नी क्षितिज्या द्वादशोद्धृता॥ त्रिज्यागुणाहोरात्रार्द्धकर्णाप्ता चरजासवः॥
तत्कार्मुकमुदक्क्रांतौ धनहानी पृथक्स्थिते॥ स्वाहोरात्रचतुर्भागे दिनरात्रिदले स्मृते॥६२॥
याम्यक्रांतौ विपर्यस्ते द्विगुणे तु दिनक्षये॥ विक्षेपयुक्तोनितया क्रांत्या भानामपि स्वके॥६३॥ भ
भोगोऽष्टशतीलिप्ता खाश्विशैलास्तथा तिथेः॥ ग्रहलिप्ता भभोगाप्ता भानि भुक्त्या दिनादि
कं॥ रवींदुयोगलिप्ताभ्यो योगा भभोगभाजिताः॥ गतगम्याश्च षष्टिघ्नाः भुक्तियोगाप्तना
डिकाः॥ अर्कोनचंद्रलिप्ताभ्यस्तिथयो भोगभाजिताः॥ गतागम्याश्च षष्टिघ्ना नाड्यो भुक्त्यंत
रोद्धृताः॥ ध्रुवाणि शकुनिर्नागं तृतीयं च चतुष्पदं॥ किंस्तुघ्नं च चतुर्दश्याः कृष्णायाश्चपरार्द्ध
तः॥ बवादीनि ततः सप्त चराख्यकरणानि च॥ मासेऽष्टकृत्व एकैकं करणानां प्रवर्तते॥६८॥
तिथ्यर्द्धभोगान् सर्वेषां करणानां प्रवर्तयेत्॥ एषा स्फुटगतिः प्रोक्ता सूर्यादीनां खचारिणां॥
क्षेपकः॥ अर्कोनचंद्रात् खरसाश्विलब्धं रूपोनिते सप्तहृते तावशेषं॥ बवादिकं चेव चराख्य
मेतत्तस्यैव नाड्यस्तिथिवद्भवंति॥७०॥ इति श्रीसूर्यमयसंवादे सूर्यसिद्धांते ग्रहस्फुटाधि
कारो द्वितीयः॥ श्रीकांतचेंतु संभुद्धे व ज्ञाले पे पिवासमे॥ रात्र रा
कं गुरु ले शि खे समसंडले मालिखेत्॥३॥

तन्मध्ये स्थापयेच्छंकुं कल्पनाद्द्वादशांगुलं॥ तच्छायाग्रं स्पृशेद्यत्र वृत्ते पूर्वापरार्द्धयोः॥२॥ तत्र
बिंदू विधायोभौ वृत्ते पूर्वापराभिधौ॥ तन्मध्ये तिमिना रेखा कर्तव्या दक्षिणोत्तरा॥३॥ याम्यो
त्तरदिशोर्मध्ये तिमिना पूर्वपश्चिमा॥ दिङ्मत्स्यमध्यैः संसाध्या विदिशस्तद्वदेव हि॥४॥
चतुरस्रं बहिः कुर्यात् सूत्रैर्मध्याद्विनिर्गतैः॥ भुजसूत्रांगुलैस्तत्र दत्तैरिष्टप्रभा मता॥५॥
प्राक्पश्चिमाश्रिता रेखा प्रोच्यते सममंडले॥ उन्मंडले च विषुवन्मंडले परिकीर्त्यते॥६॥
रेखा प्राच्यपरा साध्या विषुवद्भाग्रगा तथा॥ इष्टछायाविषुवतोर्मध्यमग्राभिधीयते॥ शंकु
छायाकृतियुतेर्मूलं कर्णोस्य वर्गतः॥ प्रोह्य शंकुकृतिं मूलं छाया शंकुर्विपर्ययात्॥८॥
त्रिंशत्कृत्यो युगे भानां चक्रं प्राक्परिलंबते॥ तद्गुणाद्भूदिनैर्भक्ताद्द्युगणाद्यदवाप्यते॥९॥
तद्दोस्त्रिघ्ना दशाप्तांशा विज्ञेया अयनाभिधाः॥ तत्संस्कृताद्ग्रहात्क्रांतिछायाचरदलादिकं॥
स्फुटं दृक्तुल्यतां गच्छेदयने विषुवद्द्वये॥ प्राक्चक्रं चलितं हीने छायार्कात्करणागते॥
अंतरांशैरथावृत्य पश्चाच्छेषैस्तथाधिके॥ एवं विषुवती छाया स्वदेशे या दिनार्द्धजाः॥
दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभा॥ शंकुछायाहते त्रिज्ये विषुवत्कर्णभाजिते॥१३॥
लंबाक्षज्ये तयोश्चापे लंबाक्षौ दक्षिणौ सदा॥ मध्यछाया भुजस्तेन गुणिता त्रिभमौर्विका॥
स्वकर्णाप्ता धनुर्लिप्ता नतास्ता दक्षिणे भुजे॥ उत्तराश्चोत्तरे याम्यास्ताः सूर्यक्रांतिलिप्तिकाः
दिग्भेदे मिश्रिताः साम्ये विश्लिष्टाश्चाक्षलिप्तिकाः॥ ताभ्योक्षज्या च तद्वर्गं प्रोह्य त्रिज्याकृ
तेः पदं॥ लंबज्यार्कगुणाक्षज्या विषुवद्भाथ लंबया॥ स्वाक्षार्कनतभागानां दिक्साम्येंतरमन्यथा॥
दिग्भेदे पक्रमः शेषस्तस्य ज्या त्रिज्ययाहता॥ परमापक्रमज्याप्ता चापं
मेषादिगो रविः॥१८॥

कर्कादौ प्रोह्य चक्रार्द्धात्तुलादौ भार्द्धसंयुतात् ।। मृगादौ प्रोह्य भगणान्मध्याह्नेऽर्कः स्फुटो भवेत् ।।१९।। तन्मांदमसकृद्वामं फलं मध्यो दिवाकरः ।। स्वाक्षार्कापमयुतिर्दिक्साम्येंतरमन्यथा ।।२०।। शेषं नतांशाः सूर्यस्य तद्बाहुज्याथ कोटिजा ।। शंकुमानांगुलाभ्यस्ते भुजात्रिज्ये यथाक्रमं ।।२१।। कोटिज्यया विभज्याप्ते छायाकर्णावहर्द्दले ।। क्रांतिज्याविषुवत्कर्णहताप्ताशंकुजीवया ।। अर्काग्रा स्वेष्टकर्णघ्नी मध्यकर्णोद्धृताः स्वकाः ।। विषुवच्छाययुतार्काग्रा याम्ये स्यादुत्तरो भुजः ।।२२ विषुवत्यां विशोध्योदग्गोले स्याद्बाहुरुत्तरः ।। विपर्ययाद्भुजो याम्यो भवेत्प्राक्अपरांतरे ।। मध्याह्नि को भुजो नित्यं छायामध्याह्निकी स्मृता ।। लंबाक्षजीवे विषुवच्छाया द्वादशसंगुणे ।। क्रांतिज्याप्ते तु तौ कर्णौ संममंडलगे रवौ ।। सौम्याक्षोना यदा क्रांतिः स्यात्तदा द्युदलश्रवः ।। विषुवच्छाययाभ्यस्तः कर्णो मध्याग्रयोद्धृतः ।। स्वक्रांतिज्या त्रिजीवाघ्नी लंबज्याप्ताग्रमौर्विका ।।२७।। स्वेष्टकर्णहता भक्ता त्रिज्ययाग्रांगुलादिका ।। त्रिज्यावर्गार्द्धतोऽग्रज्यावर्गोनाद्द्वादशाहतात् ।। पुनर्द्वादशनिघ्नाच्च लभ्यते यत्फलं बुधैः ।। शंकुवर्गार्द्धसंयुक्तविषुवद्वर्गभाजितात् ।। तदेव करणीनाम तां पृथक्स्थापयेद्बुधः ।। अर्कघ्ना विषुवच्छाया अग्रज्यागुणिता तथा ।। भक्ताप्तं [illegible] फलाख्यं तद्वर्गसंयुक्तकरणीपदं ।। फलेन हीनसंयुक्तं दक्षिणोत्तरगोलयोः ।। याम्ययोर्विदिशोः शंकुः [illegible] वं याम्योत्तरे रवौ ।। परिभ्रमति शंकोस्तु शंकुरुत्तरयोस्तु सः ।।३२।। तत्त्रिज्यावर्गविश्लेषा न्मूलं दृग्ज्याभिधीयते ।। स्वशंकुना विभज्याप्ते दृक्त्रिज्ये द्वादशाहते ।। छायाकर्णौ तु कोणेषु

धु

फ

ऽर्कघ्ना ग्रा दोर्ध भाजिता ।।३५।।

यत्र स्युः ते द्वादशाहते ।। [illegible] ।।३४।।

[illegible]

त्रिभज्यया भवेच्छंकुस्तद्वर्गं प्रविशोधयेत्॥ त्रिज्यावर्गात्पदं दृग्ज्या छायाकर्णौ तु पूर्ववत्॥
अभीष्टछायया भ्यस्ता त्रिज्यार्ककर्णभाजिता॥ दृग्ज्या तद्वर्गसंशुद्धात्त्रिज्यावर्गाच्च य
त्पदं॥ शंकुः स त्रिभजीवाघ्नः स्वलंबज्याविभाजितः॥ छेदः स त्रिज्यया भ्यस्तः स्वाहोरात्रार्द्ध
(उत्क्रमज्या त्रि) भाजितः॥ उन्नतज्या तया हीना स्वान्त्या शेषस्य कार्मुकं॥ रेवं स्युः प्राक्पश्चिमार्द्धे नतासवः॥३९॥
इष्टाग्राघ्नी तु लंबज्या स्वकर्णांगुलभाजिता॥ क्रांतिज्या सा त्रिजीवाघ्नी परमापक्रमोद्धृता॥ त
च्चापं भादिकं क्षेत्रं पदैस्तत्र भवा रविः॥ इष्टेऽह्नि मध्ये प्राक्पश्चाद्धृते बाहुत्रयांतरे॥४१॥
मत्स्यद्वयांतरयुतेस्त्रिस्पृक्सूत्रेण भाभ्रमः॥ त्रिभद्युकर्णार्द्धगुणाः स्वाहोरात्रार्द्धभाजिताः॥ क्रमा
देक १७१९ द्वि २९७८ त्रिभज्या ३४३८ तच्चापानि पृथक् पृथक्॥ स्वाधोधः प्रविशोध्याथ मेषा
ल्लंकोदयासवः॥ व्यस्ताः व्यस्तैर्युताः स्वैः स्वैः कर्कटाद्यास्तथा त्रयः॥ उत्क्रमेण षडेते भवं
तीष्टा ~~तुलास~~ दयाः ~~स्वके~~ ॥४४॥ गतभोग्यासवः कार्या भास्करादिष्टकालिकात्॥ स्वोद (तुला)

खागाष्टयोऽर्थगोऽगैकाः शरत्र्यंकहिमांशवः॥ स्वदेशचरखंडोना भवंतीष्टोदयासवः॥४४॥ प॰ १॥

यासुहता भुक्तभोग्यांशाः खवह्निभिः॥४६॥ अभीष्टघटिकासुभ्यो भोग्यासून्प्र
विशोधयेत्॥ तद्वत्तदेष्यलग्नानेवं यातास्तथोत्क्रमात्॥ शेषं चेत्त्रिंशताभ्यस्तमशुद्ध
नाविभाजितं॥ भागहीनं च युक्तं च तल्लग्नं क्षितिजे सदा॥४८॥ प्राक्पश्चान्नतनाडिभिः
स्तद्वल्लंकोदयासुभिः॥ भानोक्षयधने कृत्वा मध्यलग्नं तदा भवेत्॥ भोग्यासूनूनकस्याथ
भुक्तासूनधिकस्य॥ सपींड्यांतरलग्नासूनेवं स्यात्कालसाधनं॥ सूर्याद्दूने निशाशेषे
लग्नेर्काधिके दिवा॥ भचक्रार्द्धयुतान्नोरधिकेस्तमयात्परं॥५१॥ इति श्रीसूर्यसि

यसंवादे श्रीसूर्यसिद्धांते त्रिप्रश्नाध्यायस्तृतीयः संपूर्णः॥

॥श्रीगणेशाय नमः॥ सार्द्धानि षट्सहस्राणि ६५०० योजनानि विवस्वतः॥ विष्कंभो मंडलस्येंदोः सहाशी
त्या चतुःशतीः॥१॥ स्फुटस्वभुक्त्या गुणितौ मध्यभुक्त्योद्धृतौ स्फुटौ॥ रवेः स्वभगणाभ्यस्तः शशांक
भगणोद्धृतः॥२॥ शशांककक्षागुणितो भाजितो वार्ककक्षया॥ विष्कंभश्चंद्रकक्षायां तिथ्याप्ता मान
लिप्तिकाः॥३॥ स्फुटेंदुभुक्तिर्भूव्यास १६०० गुणिता मध्ययोद्धृताः॥ लब्धं सूचीमहीव्यास स्फुटार्कश्रवणां
तरं॥४॥ मध्येंदुव्यासगुणितं मध्यार्कव्यासभाजितं॥ विशोध्य लब्धं सूच्यांतु तमो लिप्तास्तु पूर्वव
त्॥५॥ भानोर्भार्द्धे महीछाया तत्तुल्येर्के समेपि वा॥ शशांकपाते ग्रहणं कियद्भागाधिकोनके॥६॥
तुल्यौ राश्यादिभिः स्यातां अमावस्यांतकालिकौ॥ सूर्येंदू पौर्णिमास्यंते भार्द्धे भागादिकौ समौ॥७॥
गतैष्यपर्वनाडीनां स्वफलेनोनसंयुतौ॥ समलिप्तौ भवेतां तौ पातस्तात्कालिकोन्यथा॥८॥ छाद
को भास्करस्येंदुरधःस्थो घनवद्भवेत्॥ भूछायां प्राङ्मुखश्चंद्रो विशत्यस्य भवेदसौ॥९॥ तात्का
लिकेंदुविक्षेपं छाद्यछादकमानयोः॥ योगार्द्धात्प्रोह्य यच्छेषं तमश्छन्नं तदुच्यते॥१०॥ ग्राह्यमानाधि
के तस्मिन्सकलं न्यूनमन्यथा॥ योगार्द्धादधिके न स्याद्विक्षेपे ग्राससंभवः॥११॥ ग्राह्यग्राहक
संयोगवियोगौ दलितौ पृथक्॥ विक्षेपवर्गहीनाभ्यां तद्वर्गाभ्यामुभे पदे॥१२॥ षष्ट्यां संगुण्य
सूर्येंद्वोर्भुक्त्यंतरविभाजिते॥ स्यातां स्थितिविमर्दार्द्धे नाडिकादिफले तयोः॥१३॥ स्थित्यर्द्ध
नाडिकाभ्यस्ता गतयः षष्टिभाजिताः॥ लिप्तादि प्रग्रहे शोध्यं मोक्षे देयं पुनः पुनः॥१४॥ तद्वि
क्षेपैः स्थितिदलं विमर्दार्द्धं तथासकृत्॥ संसाध्यमन्यथा पाते तल्लिप्तादिफलं स्वकं॥१५॥
स्फुटस्थित्यर्द्धवसाने तु मध्यग्रहणमादितः॥ स्थित्यर्द्धनाडीकाहीने ग्रासो मोक्षस्तु संयुते॥१६॥

भानोः सकाशात् भार्द्धे मही छाया भ्रमति॥ तत्तुल्ये शशांकपाते तदा ग्रहणं वा॥
अर्कसमेपि शशांकपाते तदा ग्रहणं॥ कियद्भागाधिकोनके तदापि॥७॥

तद्द्देशविमर्दार्द्धं नाडिका हीनसंयुतौ॥ निमीलोन्मीलनाख्ये तु भवेतां सकलग्रहे ॥१७॥ इष्टनाडीविहीनेन स्थित्यर्द्धेनार्कचन्द्रयोः॥ भुक्त्यन्तरं समाहन्यात् षष्ट्याप्ताः कोटिलिप्तिकाः॥१८॥ भानोर्ग्रहे कोटिलिप्ता मध्यस्थित्यर्द्धसंगुणाः॥ स्फुटस्थित्यर्द्धसंभक्ताः स्फुटाः कोटिकलाः स्मृताः॥१९॥ क्षेपो भुजस्तयोर्वर्गयुतेर्मूलं श्रवस्तु तत्॥ मानयोगार्द्धतः प्रोह्य ग्राह्यसच्छन्नलिप्तिकं भवेत्॥२०॥ मध्यग्रहणतश्चोर्द्ध्वमिष्टनाडीर्विशोधयेत्॥ स्थित्यर्द्धान्मौक्षिकाच्छेषं प्राग्वच्छेषं तु मौक्षिके॥२१॥ ग्राह्यग्राहकयोगार्द्धाच्छोध्याः स्वच्छन्नलिप्तिकाः॥ तद्वर्गात् प्रोह्य तत्कालं विक्षेपस्य कृतिं पदम्॥२२॥ कोटिलिप्ता रवेः स्पष्टस्थित्यर्द्धेनाहताहृताः॥ मध्येनालिप्तास्तन्नाड्यः स्थित्यर्द्धवच्च नाडिकाः॥२३॥ नतज्यास्वज्यया भक्ता त्रिज्याप्तातस्य कार्मुकं॥ वलनांशाः सौम्ययाम्याः पूर्वापरकपालयोः॥२४॥ राशित्रययुताद्ग्राह्याल्क्रांत्यंशैर्दिक्समैर्युताः॥ भेदे तरं ज्यावलनाः सप्तत्यंशा ७० गुलाग्निताः॥२५॥ सौम्यं ते दिनमध्यार्द्ध दिनाद्धे संफलेन तु॥ छिद्यात् विक्षेपमानानि तान्येषाम् अंगुलानि तु॥२६॥ इति श्रीसूर्यमयसंवादे श्रीसूर्यसिद्धांते चन्द्रग्रहणाधिकारश्चतुर्थः॥ मध्यलग्नसमे भानौ हरिजस्य न संभवः॥ अक्षोदङ्मध्यमक्रांतिसाम्ये नावनतेरपि॥१॥ देशकालविशेषेण यथावनतिसंभवः॥ लंबनस्यापि पूर्वान्यदिग्वशाच्च तथोच्यते॥२॥ लग्नं पर्वान्तनाडीनां कुर्यात्स्वैरुदयासुभिः॥ तज्ज्याग्र्यन्त्यापक्रमज्याघ्नी १३९७ लंबज्याप्तोदयाभिधा॥३॥ तदा लंकोदयैर्लग्नं मध्यसंज्ञं यथोदितं॥ तत्क्रांत्यक्षांशसंयोगा दिक्साम्ये तरमन्यथा॥४॥ शेषं नतांशास्तन्मौर्वी मध्यज्या साभिधीयते॥ मध्योदयज्यया भ्यस्ता त्रिज्याप्ता वर्गितं फलं॥५॥ मध्यज्यावर्गविश्लिष्टं दृक्क्षेपः शेषतः पदं॥ तत्रिज्यावर्गविश्लेषान्मूलं शंकुः स दृग्गतिः॥६॥ नतांशबाहुकोटिज्ये स्फुटे दृक्क्षेपदृग्गती॥ एकज्यावर्गतश्छेदो लब्धं दृग्गतिजीवया॥७॥ मध्यः मध्यज्यया उदयज्यया भ्यस्ता गुणितागपंक्तिः॥ मध्यलग्न (ज्यावर्गतः छेदो लब्धं दृग्गतिजीवया॥७॥
स्वयेन तांशाः स्वस्य भुजकोटिज्ये कार्ये ते स्फुटे दृक्क्षेपदृग्गती भवतः॥ दृग्गतिजीवया एकज्यावर्गतः भक्तं लब्धं (छेदः॥ पं. २॥

दिग्भेदे तरं तस्य ज्यावलनांतरज्याताः सप्ततिभक्ता अंगुलात्मकं वलनं भवति॥ कृन्नत सहितं दिनं पाशेन दिनेन भक्तमाप्तांशफलेन विक्षेपमानानि भक्ताः एषां विक्षेपांगुलानि स्युः॥ (पंक्ति ९॥
सं. ७

भानौ मध्यलग्नसमे तदा हरिजस्य वनतस्य संभवो नास्ति॥ अक्षोदङ्मध्यक्रांतिः॥ अक्षांशाः मध्यलग्नस्योदक्क्रांतिः॥ अनयोः साम्ये तदावनतेरपि संभवो (नास्ति॥ पंक्ति ११॥
८

मध्यलग्नार्कविश्लेषज्याछेदेन विभाजिताः॥ रवींद्वोर्लंबनं प्राक्पश्चाद्घटिकादिकं॥८॥मध्यलग्नाधिके भानौ
तिथ्यंतात्प्रविशोधयेत्॥धनमूनेऽसकृत्कर्म यावत्सर्वं स्थिरीभवेत्॥९॥दृक्क्षेपःशीततिग्मांशोर्मध्यभुक्त्यं
तराहतः॥तिथिघ्नत्रिज्ययाभक्तो ५१५७० भक्तो लब्धा सावनतिर्भवेत्॥१०॥दृक्क्षेपात्सप्ततिहृताद्भवेद्वावनतिः
फलं॥अथवात्रिज्ययाभक्ता सप्तसप्तक ४९ से गुणात्॥मध्यज्यादिकृवर्गात्सा च विज्ञेयादक्षिणोत्तरा॥११॥
सेंदुविक्षेपदिक्साम्ये युक्ताविश्लेषितान्यथा॥१२॥तयास्थितिविमर्दार्धे ग्रासाद्यं तु यथोदितं॥प्रमाणवलं
नाभीष्टग्रासादिहिमरश्मिवत्॥१३॥स्थित्यर्धेनाधिकात्प्राग्वत्तिथ्यंताल्लंबनं पुनः॥ग्राससमोक्षोद्भवं साध्यं
तन्मध्यं हरिजांतरे॥१४॥प्राक्कपालेऽधिकं मध्या भवेत्प्राक्ग्रहणं यदि॥मोक्षिकं लंबनं हीनं पश्चार्धे तु विप
र्ययः॥१५॥तदामोक्षस्थितिर्दले देयप्राक्ग्रहणे तथा॥हरिजांतरकं शोध्यं यत्रैते स्याद्विपर्ययः॥१६॥ए
तदुक्तं कपालैक्ये तद्भेदे लंबनैकता॥स्वेस्वे स्थितिदलेयोज्यविमर्दार्धेपि चोक्तवत्॥१७॥इति श्रीसूर्यमयसं
वादे सूर्यसिद्धांते सूर्यग्रहणाधिकारः पंचमः॥न छेदकमृते यस्माद्भेदाग्रहणयोःस्फुटाः॥ज्ञायते तत्प्रव
क्ष्यामि छेद्यकं ज्ञानमुत्तमं॥१॥सुसाधितायामवनौ बिंदुं कृत्वा ततो लिखेत्॥सप्तवर्गांगुलेनादौ मंडलं व
लनाश्रितं॥२॥ग्राह्यग्राहकयोगार्धे संमितेन द्वितीयकं॥मंडलं तत्समासस्य सार्धेन ग्राह्यार्धेन तृतीयकं॥३॥
याम्योत्तरप्राक्अपरा साधनं पूर्वदिशां॥प्राग्ग्रहणं पश्चान्मोक्षोर्केस्य विपर्ययात्॥४॥यथादिशं प्रग्र
हणं वलनं हिमदीधितेः॥मोक्षिकं तु विपर्यस्तं विपरीतमिदं रवेः॥५॥वलनाग्रान्नयेन्मध्यं सूत्रं यद्यत्र संस्पृशे
त्॥तत्समारक्षेततोदेवायो विक्षेपो ग्रासमोक्षिको॥६॥विक्षेपाग्रात्पुनः सूत्रं मध्याबिंदुप्रवेशयेत्॥तद्ग्राह्यबिं
बसंस्पर्शाद्ग्राससमोक्षो विनिर्दिशेत्॥७॥नित्यशोर्कस्य विक्षेपाः परिलेखे यथादिशं॥विपरीताःशशांकस्य
तद्वशादथ मध्यमं॥८॥वलनं प्राङ्मुखं देयं तद्विक्षेपैकता यदि॥भेदे पश्चान्मुखं देयमिंदोर्भानोर्विपर्ययात्॥९॥

[illegible] ॥११॥

[illegible]

मध्यात्सूत्रेण विक्षेपं वलनाभिमुखं नयेत्॥१०॥ विक्षेपाग्राल्लिखेद्वृत्तं ग्राहकार्द्धेन तेन चेत्॥ ग्राह्यवृत्तं स
माक्रांतं तद्ग्रस्तं तमसा भवेत्॥११॥ छेद्यकं लिखिता भूमौ फलके वा विपश्चिता॥ विपर्ययो दिशां कार्यः पू
र्वापरकपालयोः॥१२॥ स्वच्छत्वाद्द्वादशांशोपि ग्रस्तश्चंद्रस्य दृश्यते॥ लिप्ताग्रयमपि ग्रस्तं तीक्ष्णत्वान्न
विवस्वतः॥१३॥ स्वसंज्ञिता स्त्रयः कार्या विक्षेपाग्रे तु बिंदवः॥ तत्र प्राङ्मध्ययोर्मध्ये तथा मोक्षिकमध्य
योः॥१४॥ लिखेन्मत्स्यौ तयोर्मध्ये मुखपुछविनिस्सृतं॥ प्रसार्य सूत्रद्वितयं तयोर्यत्र युतिर्भवे
त्॥१५॥ तत्र सूत्रेण विद्धि लिखेच्चापं बिंदुत्रयस्पृशा॥ स पंथा ग्राहकस्योक्तो ग्राह्यं नासौ संप्रयास्यति॥१६॥
ग्राह्यग्राहकयोगार्द्धं प्रोज्झेयं ग्राससमागतं॥ अवशिष्टांगुलसमां शलाकां मध्यबिंदुतः॥१७॥ तयो
र्मार्गोन्मुखीं दद्याद्ग्रासतः प्राग्ग्रहाश्रितां॥ विमुच्य मोक्षशिरसि ग्राहकध्वानमेव सा॥१८॥
स्पृशेद्यत्र ततो वृत्तं ग्राहकार्द्धेन संलिखेत्॥ तेन ग्राह्याद्यदाक्रांतं तत्तत्स्याद्ग्रस्तमादिशेत्॥१९॥
मानांतरार्द्धेनामितां शलाकां ग्रासदिङ्मुखीं॥ निमीलनाख्योर्दद्यात्स तन्मार्गे यत्र संस्पृशेत्॥२०॥
ततो ग्राहकखंडेन प्राग्वन्मंडलमालिखेत्॥ तद्ग्राह्यमंडलयुतिर्यत्र तत्र निमीलनं॥२१॥ एवमु
न्मीलने मोक्षदिङ्मुखीं संप्रसारयेत्॥ विलिखेन्मंडलं प्राग्वदुन्मीलनमथोक्तवत्॥२२॥ अ
र्द्धादूने सधूम्रं स्यात्कृष्णमर्द्धाधिके भवेत्॥ विमुंचतः कृष्णताम्रं कपिलं सकलग्रहे॥२३॥ रह
स्यमेतद्देवानां न देयं यस्य कस्यचित्॥ सुपरीक्षितशिष्याय दातव्यं ज्ञानमुत्तमं॥२४॥ इति श्री
सूर्यमयसंवादे श्रीसूर्यसिद्धांते छेद्याधिकारः षष्टमः॥ ताराग्रहाणामन्योन्यं स्यातां युद्धसमागमौ॥
समागमः शशांकेन सूर्येणास्तमनं सह॥१॥ शीघ्रे मंदाधिके तीतः संयोगो भवितान्यथा॥ द्वयोः प्रा
ग्यायिनोरेवं वक्रिणोस्तु विपर्ययात्॥२॥ प्राग्यायिन्यधिके तीतो वक्रिण्येष्यः समागमः॥ ग्रहांतरक
लाः स्वस्वभुक्तिशिष्टाः समाहृताः॥

+ एतदुक्तं भवति॥ शीघ्राधिके मंदे गते संयोगो भविष्यति॥ एवं प्राग्यायिनोः॥ वक्रिणोस्तु विपर्ययात्॥ मं॰ शीघ्रे मंदे शीघ्रे गते संयोगो भविता॥ शीघ्राधिके मंदे गते संयोगोऽतीतः॥ पं॰ ७॥ +

भुक्त्यंतरेण विभजेदनुलोमविलोमयोः॥ द्वयोर्वक्रिण्ययैकस्मिन्भुक्तियोगेन भाजयेत्॥४॥ लब्धं लिप्तादिकं शोध्यं
गतेदेयं भविष्यति॥ विपर्ययाद्वक्रगयोरेकस्मिंस्तु धनक्षयो॥५॥ समलिप्तौ भवेतां तौ ग्रहौ भगणसंस्थितौ॥
विवरं तद्वदुद्धृत्य दिनादि फलमिष्यते॥६॥ कृपादिनक्षपामानं तथा विक्षेपलिप्तिका॥ नतोन्नतं साधयित्वा
स्वकाद्युन्नवशात्तयोः॥७॥ विषुवच्छाययाभ्यस्ताद्विक्षेपाद्द्वादशोद्धृतात्॥ फलं स्वनतनाडीघ्नं स्वदिनार्द्ध
विभाजितं॥८॥ लब्धं प्रागामृणं सौम्याद्विक्षेपात्पश्चिमे धनं॥ दक्षिणे प्राक्कपाले स्वं पश्चिमे तु तथा क्षयः॥
[unclear]॥९॥ लब्धं ग्राम्यमृणं सौम्याद्विक्षेपा[unclear]धिका[unclear]क्षेपलिप्तिकाः॥ विकला स्वमृणं क्रांतिक्षेपयोर्भिन्नतुल्ययोः॥१०॥ नक्ष-
त्रसत्रिभग्रहजक्रांति भाग[unclear]घ्नाक्षेपलिप्तिकाः॥ विकला स्वमृणं [unclear]॥११॥ तात्कालिकौ पुनः
त्र्यहयोगेषु ये स्वेस्तोदयसाधने॥ भृगोर्न्नतौ तु चंद्रस्य दृक्कर्मादावदं स्मृतं॥११॥ तात्कालिकौ पुनः
कार्यौ विक्षेपौ च तयोस्ततः॥ दिक्तुल्ये त्वंतरं भेदे योगः शिष्टं ग्रहांतरं॥१२॥ कुजार्किज्ञामरेज्यानां
त्रिंशदर्द्धार्द्धवर्द्धिताः॥ विष्कंभाश्चंद्रकक्षायां भृगोः षष्टिरुदाहृताः॥१३॥ त्रिचतुःकर्ण
युक्त्याप्तास्तेद्विघ्नास्त्रिज्यया हृताः॥ स्फुटाः स्वकर्णास्तिथ्याप्ताः भवेयुर्मानलिप्तिकाः॥१४॥ छायाभू-
मौ विपर्यासे स्वच्छायाग्रे प्रदर्शयेत्॥ ग्रहः स्वदर्शनालयः स्थः शंकुयेसंप्रदृश्यते॥१५॥ पंचहस्तो
च्छ्रितौ शंकू यथादिग्भ्रमणास्थितौ॥ ग्रहांतरेण विक्षिप्तावधो हस्तनिखातगौ॥१६॥ छायाकर्णौ ततो
दद्या छायाग्राच्छंकुमूर्द्धगौ॥ छायाकर्णाग्रसंयोगे संस्थितस्य प्रदर्शयेत्॥ स्वशंकुमूर्द्धगौ व्योम्नि ख-
ट्योदक्तुल्यतामितौ॥ उल्लेखं तारकास्पर्शाद्भेदे भेदः प्रकीर्त्यते॥ युद्धमंशुविमर्दाख्यमंशुयोगे परस्परं॥
स्परं॥ अंशादूनेऽपसव्याख्यं युद्धमेकश्चेदणु॥ समागमोंऽशादधिके भवतश्चेद्बलान्वितौ॥ अपसव्ये
जितो युद्धे पिहितोऽणुरदीप्तिमान्॥२०॥ रूक्षो विवर्णो विध्वस्तो विजितो दक्षिणाश्रितः॥ उदक्स्थो
दीप्तिमान्स्थूलो जयी याम्योपि यो बली॥ आसन्नावप्युभौ दीप्तौ भवतः स्तोस्समागमो॥

॥२४॥

उदक्स्थो दक्षिणस्थो वा भार्गवः प्रायशो जयी ॥ शशांके नैवमेतेषां कुर्यात्संयोगसाधनं ॥ २३ ॥
भावाभावाय लोकानां कल्पनेयं प्रदर्शिता ॥ स्वमार्गगाः प्रयांत्येते दूरमन्योन्यमाश्रिताः ॥ २४ ॥
इति श्रीसूर्यमयसंवादे सूर्यसिद्धांते ग्रहयुत्यधिकारः सप्तमः ॥ प्रोक्तो योगो लिप्तिका भानां स्वभो
यद्दशाहताः ॥ भवंत्यतीतधिष्ण्यानां भोगलिप्ताः ८०० युता ध्रुवाः ॥ १ ॥ अष्टबाणा वा ४८०
शून्यकृता ४०० पंचषष्टी ६५० नगेषवः ५७० ॥ अष्टार्था ५८० गोध्रयो ४९० व्याध्रागाः ७८० स्वं
गागा ७६० मनव १४० स्तथा ॥ कृतेषवो युगरसा ६४० शून्यबाणाः ५०० वियद्रसाः ॥ खवेदा
४०० सागरनगाः ७४० गजागाः ७८० सागरर्तवः ६४० ॥ २ ॥ मनवो १४० थ रसा वेदा ६०।४०
वैश्वमाप्यर्द्धभोगगं ॥ ४०० ॥ आप्यस्यैवाभिजित्प्रांते ३६० वैश्वांते श्रवणस्थितिः ॥ ८०० ॥ ४ ॥
त्रिचतुःपादयोः संधौ श्रविष्ठा श्रवणस्य तु ॥ स्वभोगतो वियन्नागाः ८०० षट्कृतिः ३६० यमे
मस्तथाश्विनः ॥ २२० ॥ ५ ॥ रंध्राद्रयः ७९० क्रमादेषां विक्षेपाः स्वाद्पक्रमात् ॥ दिङ्मासा १२ विष
याः ५ सौम्ये याम्ये पंचैंद्रश १० नव ९ ॥ ६ ॥ सौम्ये रसा ६ खं० याम्येऽगाः ७ सौम्ये खा० र्को १२
स्त्रयोदश १३ ॥ दक्षिणे रुद्र ११ यमलाः २ सप्तत्रिंश ३७ त्तथोत्तरे ॥ ७ ॥ याम्येध्यर्द्ध १।३० त्रि
क ३ कृता ४ नव ९ सार्द्धशरे ५।३० षवः ॥ ५ ॥ उत्तरस्यां तथा षष्टि ६० त्रिंश ३० षट्त्रिंश ३६
देवहि ॥ ८ ॥ दक्षिणे त्वर्द्ध भाग ३० स्तु चतुर्विंशति २४ रुत्तरे ॥ भागाः षड्विंशतिः खं च ० द
स्रादीनां यथाक्रमं ॥ ९ ॥ अशीति भागे ८० याम्यायामगस्त्यो मिथुनांततः ॥ षड्विंशे २६ २६०
मिथुनस्यांशे मृगव्याधो व्यवस्थितः ॥ विक्षिप्तो दक्षिणे भागे खार्णवैः ४० स्वादपक्रमात् ॥
हुतभुग्ब्रह्महृदयं वृषे द्वाविंशभागगौ ॥ ११ ॥ अष्टाभि ८ स्त्रिंशता चैव ३० विक्षिप्तावुत्तरेण तौ

पूर्वाभाद्रस्य अर्द्धे भोगांशैर्भुजु उत्तरभाद्रस्य भोगः ॥ ६०८ ॥ धनिष्ठायाः (भोगांतः ॥ ५० ९

॥ २४ ॥ [illegible]

वृषे सप्तदशे १७ भागे यस्य याम्यां शकद्वयात् ॥ विक्षेपाभ्यधिको भिंद्या रोहिण्याः शकटं तु सः ॥१३॥
ग्रहवत् द्युनिशं भानां कुर्यात् दृक्कर्म पूर्ववत् ॥ ग्रहमेलकवच्छेषं ग्रहभुक्त्यादिनानि च ॥१४॥ एष्यो ही
नेग्रहे योगो ध्रुवकादधिके गतः ॥ विपर्ययाद्वक्रगते ग्रहे ज्ञेयः समागमः ॥१५॥ फाल्गुन्योर्भाद्रपद
योस्तथैवाषाढयोर्द्वयोः ॥ विशाखाश्विनीसौम्यानां योगतारोत्तराः स्मृताः ॥१६॥ पश्चिमोत्तरताराया
द्वितीया पश्चिमे स्थिता ॥ हस्तस्य योगतारा सा श्रविष्ठायाश्च पश्चिमा ॥१७॥ ज्येष्ठाश्रवणमैत्राणां
बार्हस्पत्यस्य मध्यमा ॥ भरण्याग्नेयपित्र्याणां रेवत्याश्चैव दक्षिणा ॥१८॥ रोहिण्यादित्यमूलानां प्रा
चीसार्पस्य चैव हि ॥ यथाप्रत्यवशेषाणां स्थूला स्याद्योगतारका ॥१९॥ सौम्यादिग्यांतरस्याग्नेर्द्विय
ड्ढंगा समाश्रिता ॥ पूर्वस्यां ब्रह्महृदया दंशकैः पंचभिः स्थितः ॥२०॥ प्रजापतिर्वृषांते सो सौम्येष्ट
त्रिंशद्दंशकैः ॥ अपांवत्सस्तु चित्रायां उत्तरेंऽशैस्तु पंचभिः ॥२१॥ बृहत्किंचिदतो भौमो शपः ष
ड्भिस्तथोत्तरे ॥ इति श्रीसूर्यमयसंवादे सूर्यसिद्धांते नक्षत्रध्रुवविक्षेपग्रहयुतिपरिज्ञानंना
माष्टमोऽधिकारः ॥ अथोदयास्तगतयोः परिज्ञानं प्रकीर्त्यते ॥ दिवाकरकराक्रांतमूर्तिनामल्प
तेजसां ॥१॥ सूर्याद्भ्याधिकाः पश्चादस्तं जीवकुजार्कजाः ॥ ऊनाः प्रागुदयं यांति शुक्रज्ञौ
वक्रिणौ तथा ॥२॥ ऊना विवस्वतः प्राच्यामस्तं चंद्रज्ञभार्गवाः ॥ व्रजंत्यभ्यधिकाः पश्चादु
दयं शीघ्रयायिनां ॥३॥ सूर्यास्तकालिकौ पश्चात्प्राच्यामुदयकालिकौ ॥ दिवा चार्केग्र
हौ कुर्याद्दृक्कर्माथ ग्रहस्य तु ॥४॥ तयोर्द्युगांतरप्राणाः कालांशाः षड्भिर्भाजिताः ॥
प्रतीच्यां षड्युतयोस्तद्द्युगांतरासवः ॥५॥ एकादशामरेज्यस्य तिथिसंख्यार्कजस्य च ॥

अस्तांशाश्च भूमिपुत्रस्य दश सप्ताधिकास्तथा ॥६॥

पश्चादस्तमयोष्टाभिरुदयः प्राङ्महत्तया ॥ प्रागस्तमुदयः पश्चादल्पत्वाद्दशभिर्भृगोः ॥७॥
एवं बुधो द्वा~~दश~~दशभिश्चतुर्भिरंशकैः ॥ वक्रीशीघ्रगतिश्चार्कात्करोत्यस्तमयोदयौ ॥८॥ ए
भ्योधिकैः कालभागैर्दृश्यान्यूनैरदर्शनाः ॥ भवंति लोके खचरा भानुभाग्रस्तमूर्तयः ॥९॥ तत्का
लांशांतरकला भुक्त्यंतरविभाजिताः ॥ दिनादि तत्फलं लब्धं भुक्तियोगेन वक्रिणे ॥१०॥ तल्ल
ग्नासुहते भुक्ती अष्टादशशतोद्धृते ॥ स्यातां कालगती ताभ्यां दिनादि गतगम्ययोः ॥११॥
स्वात्यगस्त्यमृगव्याधचित्राज्येष्ठापुनर्वसु ॥ अभिजिद्ब्रह्महृदयं त्रयोदशभिरंशकैः ॥१२॥
हस्तश्रवणफाल्गुन्यः श्रविष्ठा रोहिणीमघा ॥ चतुर्दशांशकैर्दृश्या विशाखाश्विनीदैवतं ॥
कृत्तिकामैत्रमूलानि सार्पं रौद्रर्क्षमेव च ॥ दृश्यंते पंचदशभिराषाढाद्वितीये तथा ॥१४॥ भर
णीतिष्यसौम्यानि सौक्ष्म्यात्त्रिःसप्तकांशकैः ॥ शेषाणि सप्तदशभिर्दृश्यादृश्यानि भानि तु ॥१५॥
अष्टादशशताभ्यस्ता दृश्यांशाः स्वोदयासुभिः ॥ विभज्य लब्धाः क्षेत्रांशास्तैर्दृश्यादृश्य
तांतथा ॥१६॥ प्रागेषामुदयः पश्चादस्तो दृक्कर्म पूर्ववत् ॥ गतैष्यदिवसप्राप्तिर्भानुभुक्त्यास
दैवहि ॥१७॥ अभिजिद्ब्रह्महृदयं स्वातीवैष्णववासवाः ॥ अहिर्बुध्न्यमुदक्स्थत्वान्नलुप्यंते र्क
रश्मिभिः ॥१८॥ इति श्रीसूर्यमयसंवादे सूर्यसिद्धांते ग्रहनक्षत्रोदयास्तमनाधिकारो नवमः ॥
उदयास्तविधिः प्राग्वत्कर्तव्यः शीतगोरपि ॥ भागैर्द्वादशभिः पश्चाद्दृश्यः प्राग्यात्यदृश्यतां ॥१॥
रवींद्वोः षड्भयुतयोः प्राग्वल्लग्नांतरासवः ॥ एकराशौ रवींद्वोश्च कार्या विवरलिप्तिकाः ॥२॥
तन्नाडीकाहते भुक्ति रवींद्वोः षष्टिभाजिते ॥ तत्फलान्वितयोर्भूयः कर्तव्याः विवरासवः ॥३॥

एवं यावत्स्थिरीभूता रवींद्वोरुदयासवः॥ तैः प्राणैरस्तमेतींदुः शुक्ले कोस्तमयात्परं॥४॥ भगणार्द्धं र
वेर्दत्वा कार्यास्तद्विवरासवः॥ तैः प्राणैः कृष्णपक्षे तु शीतांशुरुदयं व्रजेत्॥५॥ शृंगोन्नतिसाधनं॥ अ
र्केंद्वोः क्रांतिविश्लेषो दिक्साम्ये युतिरन्यथा॥ तज्ज्येंद्वर्को यतश्चासौ विज्ञेया दक्षिणोत्तरा॥६॥ मध्याह्नेंदु
प्रभाकर्णसंगुणा यदि चोत्तरा॥ तदार्कघ्ना १२ क्षजीवायां शोध्या योज्या तु दक्षिणा॥७॥ शेषं लंब
ज्यया भक्ताल्लब्धो बाहुः स्वदिङ्मुखः॥ कोटिः शंकु १२ स्तयोर्वर्गयुतेर्मूलं श्रुतिर्भवेत्॥८॥ सूर्यो
नशीतगोर्लिप्ताः शुक्लं नवशतो ९०० द्धृताः॥ चंद्रबिंबांगुलाभ्यस्तं हृतं द्वादशराशिभिः स्फुटं।
दृष्टार्कसंज्ञितं बिंदुं ततो बाहुं स्वदिङ्मुखं॥ ततः पश्चान्मुखी कोटिं कर्णं कोट्यग्रमध्यगं॥१०॥
कोटिकर्णयुताद्बिंदोर्बिंबं तात्कालिकं लिखेत्॥ कर्णसूत्रेण दिक्सिद्धिं प्रथमं परिकल्पयेत्॥११॥
शुक्लं कर्णेन तद्बिंबं योगादंतर्मुखं नयेत्॥ शुक्लाग्रयाम्योत्तरयोर्मध्ये मत्स्यौ प्रसाधयेत्॥१२॥
तन्मध्यसूत्रसंयोगाद्बिंदुत्रिस्पृक्लिखेद्धनुः॥ प्राग्बिंबं यादृगेवं स्यात्तादृक्तत्राद्दिने शशी॥१३॥
कोट्यां दिक्साधनात्तिर्यक्सूत्रांते शृंगमुन्नतं॥ दर्शयेदुन्नतां कोटिं कृत्वा चंद्रस्य चाकृतिं॥१४॥
कृष्णे षड्भयुतं सूर्यं विशोध्येंदोस्तथासितं॥ दद्याद्वामं भुजं तत्र पश्चिमं मंडलं विधोः॥१५॥ इ
सूर्य ति श्री सूर्यमयसंवादे सिद्धांते शृंगोन्नतिर्दशमोध्यायः॥ एकायनगतौ स्यातां सूर्याचंद्रमसौ
यदा॥ तद्युतौ मंडले स्वातां १२ क्रांत्योस्तुल्यत्वे वैधृताभिधः॥१॥ विपरीतायनगतौ चंद्रार्कौ क्रांति
लिप्तिकाः॥ समास्तदा व्यतीपातो भगणार्द्धे तयोर्युतौ॥२॥ तुल्यांशुजालसंपर्कात्तयोस्तु प्र
वहाहतात्॥ तद्दृक्क्रोधाद्भवो वन्हिर्लोकाभावाय जायते॥३॥ विनाशयति पातोस्मिन्
तः लोकानामसकृद्यतः॥ व्यतीपातः प्रसिद्धोयं संज्ञाभेदेन वैधृतः॥ स कृष्णो दारुणवपु

भास्करेंद्वोर्भचक्रांतश्चक्रार्द्धावधिसंस्थयोः॥ दृक्तुल्यसाधितांशादियुक्तयोःस्वावपक्रमौ॥
अथोजपदगस्येंद्वोः क्रांतिर्विक्षेपसंस्कृता॥ यदि स्यादधिका भानोः क्रांतेःपातोगतस्तदा॥
ऊना चेत्स्यात्तदा भावी वामं युग्मपदस्य च॥ पदान्यत्वे विधोः क्रांतिर्विक्षेपाच्चेद्विशुध्यति॥८॥ क्रां
त्योर्ज्ये त्रिज्ययाभ्यस्ते परक्रांतिज्ययोद्धृते॥ तच्चापांतरमर्द्धं वा योज्यं भाविनि शीतगौ॥९॥
शोध्यं चंद्राद्गते पाते तत्सूर्यगतिताडितं॥ चंद्रभुक्त्याहृतं भानौ लिप्तादि शशिवत्फलं॥१०॥
तद्वच्छशांकपातस्य फलं देयं विपर्ययात्॥ कर्मैतदसकृत्तावद्यावत्क्रांती समे तयोः॥११॥
क्रांत्योः समत्वे पातोथ प्रक्षिप्तांशान्विते विधौ॥ हीनेर्द्धरात्रिकाद्यातो भावी तात्कालिकेधिके
॥स्थिरीकृतेर्द्धरात्रेंद्वोर्द्वयोर्विवरलिप्तिकाः॥ षष्टिघ्नाश्चंद्रभुक्त्याप्ताः पातकालस्य
नाडिकाः॥ रवींद्वोर्मानयोगार्द्धं षष्ट्यासंगुण्य भाजयेत्॥ तयोर्भुक्त्यंतरेणाप्तं स्थित्यर्द्धं ना
डिकादिकं॥१४॥ पातकालस्फुटोमध्यः सोपि स्थित्यर्द्धवर्जितः॥ तस्य संभवकालःस्यात्तत्संयुक्तो
न्त्यसंज्ञकः॥१५॥ आद्यंतकालयोर्मध्यः कालो ज्ञेयोतिदारुणः॥ प्रज्वलज्ज्वलनाकारः सर्वकर्मसु
गर्हितः॥१६॥ एककाष्ठागतौ यावदर्केंद्वोर्मंडलांतरं॥ संभवस्तावदेवास्य सर्वकर्मविनाशकृत्॥
स्नानदानजपःश्राद्धव्रतहोमादिकर्मभिः॥ प्राप्यते सुमहच्छ्रेयस्तत्कालज्ञानतस्तथा॥१८॥
रवींद्वोस्तुल्यतां क्रांत्योर्विषुवत्सन्निधौ यदा॥ द्विर्भवेद्धि तथापातः स्यादभावो विपर्ययात्॥
शशांकार्कयुतेर्लिप्ता भभोगेन विभाजिताः॥ लब्धं सप्तदशांत्योन्यो व्यतीपातस्तृतीयकः॥
सार्पेंद्रपौष्ण्यधिष्ण्यानामंत्यपादाभसंधयः॥ तदाद्यभेषु पादार्द्धं गंडांतं नाम कीर्तितं॥२१॥
व्यतीपातत्रयं घोरं गंडांतत्रितयं तथा॥ एतद्भसंधित्रितयं सर्वकर्मसु वर्जयेत्॥२२॥इ

[illegible]

अल्पावशिष्टे तु कृते मयनामा महासुरः। रहस्यं परमं पुण्यं जिज्ञासुर्ज्ञानमुत्तमम्॥ इदानीं सौर सूत्रस्य पाश्चे माईं विवृणमहे ॥१॥ अथार्कांशसमुद्भूतं
प्रणिपत्य कृताञ्जलिः ॥ भक्त्या परमया भ्यर्च्य पप्रच्छेदं मयासुरः ॥२॥ श्रीमय उवाच ॥ भगवन् किं प्रमा
णा भूः किमाधारा किमाश्रया ॥ किं विभागा कथं चात्र सप्तपातालभूमयः ॥३॥ अहोरात्रव्यवस्थां च विदधा
ति कथं रविः ॥ कथं पर्येति वसुधां भुवनानि विभावयन् ॥४॥ देवासुराणामन्योन्यमहोरात्रं विपर्ययात् ॥ कि
मर्थं तत्कथं वास्य ज्ञानो भगणपूरणात् ॥ पित्र्यं मासेन भवति नाडिषष्ट्या तु मानुषं ॥ तद्देवाकिल्कस्स वैच
न भवेल्लके नहे तु ना ॥ दिनाद्बमासहोराणामधिपा न समाः कुतः ॥ कथं पर्येति भगणः सग्रहोयं किमाश्रयः
॥ भूमेरुपर्यधोधस्या कि मुत्सेधाः किमन्तराः ॥ ग्रहर्क्षकक्ष्याः किंमात्रा स्थिताः केन क्रमेण ताः ॥८॥
ग्रीष्मे तीव्रकरो भानुर्न हेमन्ते तथाविधः ॥ कियती तत्करप्राप्तिर्मानानि कति किं च तैः ॥९॥ एवं मे संशयं छिंधि भगवन् भूतभावनः ॥ अन्यो न त्वामृते छेत्ता विद्यते सर्वदर्शिवान् ॥१०॥ इति भक्त्योदितं
श्रुत्वा मयोक्तं वाक्यमस्य हि ॥ रहस्यं परमं ध्यायं स्ततः प्राह पुनः सतः ॥११॥ श्रीसूर्य उवाच ॥ वा
सुदेवः परं ब्रह्म तन्मूर्तिः पुरुषः परः ॥ अव्यक्तो निर्गुणः शांतो विंच विंशात्परोव्ययः ॥१२॥ प्रकृत्यंत
र्गतो बीचो वहुरंतश्च सर्वगः ॥ संकर्षणोप सृष्ट्वादौ तासु बीजमवासृजत् ॥१४॥ तदंडमभवद्धैमं
सर्वत्र तमसावृतं ॥ तत्रानिरुद्धः प्रथमं व्यक्तीभूतः सनातनः ॥१५॥ हिरण्यगर्भो भगवानेष छंदसि प
ठ्यते ॥ आदित्यो ह्यादिभूतत्वात्प्रसूत्या सूर्य उच्यते ॥१६॥ परं ज्योतिस्तमः पारे सूर्योयं सवितोतिच ॥
पर्येति भुवनान्येष पालयन् भूतभावनः ॥ प्रकाशात्मा तमो हंता महानित्येष विश्रुतः ॥ ऋचोस्य मं
डलं सामान्युस्त्रा मूर्तिर्यजूंषि च ॥१८॥ त्रयीमयोयं भगवान् कालात्मा कालकृद्विभुः ॥ सर्वात्मा
सर्वगः सूक्ष्मः सर्वमस्मिन् प्रतिष्ठितं ॥१९॥ रथे विश्वमये चक्रं कृत्वा संवत्सरात्मकं ॥ छंदांस्यश्वाः

सोऽहंकाराज्जगत्सृष्टौ ब्रह्माणमसृजेज्जेभुः ॥२१॥ तस्मै वेदान्वरान्दत्वा सर्वलोकपितामहं ॥ प्रतिष्ठा
प्यांतमध्येच स्वयंपर्येति भावयन् ॥ अथ सृष्ट्यमनःसक्ष्वा चक्रे ब्रह्माहंकारमूर्तिमान् ॥ मनसश्चंद्रमा
जज्ञे सूर्योक्ष्णोस्तेजसांनिधिः ॥२३॥ मनसः खं ततो वायुरग्निरापोधराः क्रमात् ॥ गुणैकवृद्ध्या पंचै
वं महाभूतानि जज्ञिरे ॥ पुनर्ब्रह्मा धारमानं ब्रह्मजद्वारि संज्ञकं ॥ नक्षत्ररूपिणं भूयः सप्तावि
शात्मकं वशी ॥२६॥ ततश्चराचरं विश्वं निर्ममे देवपूर्वकं ॥ ऊर्ध्वमध्याधरेभ्योथ स्रोतोभ्यः
प्रकृतीः सृजन् ॥ गुणकर्मविभागेन सृष्ट्वा प्राग्वदनुक्रमात् ॥ विभागं कल्पयामास यथास्वं वेद
दर्शनात् ॥ ग्रहनक्षत्रताराणां भूमेर्विश्वस्य वा विभुः ॥ देवासुरमनुष्याणां सिद्धानां च यथाक्रमा
त् ॥ ब्रह्मांडमेतत्सुषिरं यत्रेदं भूर्भुवादिकं ॥ कटाहद्वितीयस्येके संपुटं गोलकाकृति ॥३०॥ ब्र
ह्मांडमध्ये परिधि व्योमकक्षाभिधीयते ॥ तन्मध्ये भ्रमणं भानामधोधः क्रमशस्तथा ॥३१॥ मंदा
मरेज्यभूपुत्रसूर्यशुक्रेंदुजेंदवः ॥ परिक्रमंत्यधोधस्थाः सिद्धविद्याधराघनाः ॥३२॥ मध्ये
समंतादंडस्य भूगोलो व्योम्नि तिष्ठति ॥ बिभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकां ॥३३॥
तदंतरपुटाः सप्त नागासुरसमाश्रयाः ॥ दिव्यौषधिरसोपेता रम्याः पातालभूमयः ॥ अने
करत्ननिचयो जांबुनदमयो गिरिः ॥ भूगोलमध्यगो मेरुरुभयत्र विनिर्गतः ॥ उपरिष्टात्स्थि
तास्तस्य सेंद्रा देवा महर्षयः ॥ अधस्तादसुरास्तद्वद्द्विषंतोन्योन्यमाश्रिताः ॥३६॥ ततः समं
तात्परिधिः क्रमेणायं महार्णवः ॥ मेखलेव स्थितो धात्र्या देवासुरविभागकृत् ॥ समंतान्मेरु
मध्यात्तु तुल्यभागेषु तोयधेः ॥ द्वीपेषु दिक्षु पूर्वाद्या नगर्यो देवनिर्मिताः ॥३८॥ भूवृत्तपादे
पूर्वस्यां यमकोटीति विश्रुता ॥ भद्राश्ववर्षे नगरी स्वर्णप्राकारतोरणा ॥ याम्यायां भारते वर्षे

उदक् सिद्धपुरी नाम कुरुवर्षे प्रकीर्तिता ॥ तस्यां सिद्धा महात्मानो निवसंति गतव्यथाः ॥४३॥
भूवृत्तपादविवरास्ताश्चान्योन्यं प्रतिष्ठिताः ॥ ताभ्यश्चोत्तरगो मेरुस्तावानेवासुराश्रयः ॥
तासामुपरिगो याति विषुवस्थो दिवाकरः ॥ न तासु विषुवच्छाया नाक्षस्योन्नतिरिष्यते ॥४३॥
मेरोरुभयतो मध्ये ध्रुवतारे नभःस्थिते ॥ निरक्षदेशसंस्थानामुभये क्षितिजाश्रये ॥ अतो नाक्षोच्छ्र
यस्तासु ध्रुवयोः क्षितिजस्थयोः ॥ नवतिर्लंबभागाश्च मेरावक्षांशकास्तथा ॥ मेषादौ देवभाग
स्थो देवानां याति दर्शनं ॥ असुराणां तुलादौ तु सूर्यस्तद्भागसंचरः ॥४६॥ अत्यासन्नतया तेन
ग्रीष्मे तीव्रकरा रवेः ॥ देवभागे सुराणां तु हेमंते मंदतान्यथा ॥ देवासुरा विषुवति क्षितिजस्थं दि
वाकरं ॥ पश्यंत्यन्योन्यमेतेषां वामसव्ये दिनक्षये ॥ मेषादावुदितः सूर्यस्त्रीन् राशीनुदगुत्तरं ॥ संच
रन् प्रागहर्मध्यं पूरयेन्मेरुवासिनां ॥४८॥ कर्कादीन् संचरंस्तद्वदह्नः पश्चार्द्धमेव सः ॥ तुलादीन्
त्रीन्मृगादींश्च तद्वदेव सुरद्विषां ॥ अतो दिनक्षपे तेषामन्योन्यं हि विपर्ययात् ॥ अहोरात्रप्र
माणं च भानोर्भगणपूरणात् ॥ दिनक्षपार्द्धमेतेषामयनांते विपर्ययात् ॥ उपर्यात्मानमन्यो
न्यं कल्पयंति सुरासुराः ॥५२॥ अन्येऽपि समसूत्रस्थाः मन्यंतेऽधः परस्परं ॥ भद्राश्वकेतुमालस्
स्थाः लंकासिद्धपुरस्थिताः ॥ सर्वत्रैवं महीगोले स्वस्थानमुपरि स्थितं ॥ मन्यंते खे यतो गोलस्त
स्य क्वोर्द्धं क्व चाप्यधः ॥ अल्पकायतया लोकाः स्वस्थानात्सर्वतोमुखं ॥ पश्यंति वृत्तामप्येतां
चक्राकारां वसुंधरां ॥ सव्यं भ्रमति देवानामपसव्यं सुरद्विषां ॥ उपरिष्टाद्भगोलोऽयं व्यक्षे
पश्चान्मुखं तथा ॥ ५३ ॥ अतस्तत्र दिनं त्रिंशन्नाडिकं शर्वरी तथा ॥ हानिवृद्धी सदा वामं सु . ध्रं के रा

रासुराणां भागयोः ॥५७॥ मेषादौ प्रत्यहं वृद्धिरुदगुत्तरतो
दिवा ॥ देवभागे क्षपाह्रासो विपरीतं तथासुरे ॥५८॥

सू॰ सि॰ ॥ १३

तुलादौ द्युनिशा वामं क्षयवृद्धी तयोरुभे ॥ देशक्रांतिवशान्नित्यं तद्विज्ञानं पुरोदितं ॥ भूवृत्तं क्रांति
भागघ्नं भगणांशविभाजितं ॥ अवाप्तयोजनैरर्को व्यक्षाद्यात्युपरिस्थितः ॥ परमापक्रमादेवं
योजनानि विशोधयेत् ॥ भूवृत्तपादाच्छेषाणि यानि स्युर्योजनानि तैः ॥ ६१॥ अयनांते विलोमेन
देवासुरविभागयोः ॥ नाडीषष्ट्या सकृदहर्निशाप्यस्मिन्सकृत्तथा ॥ ६२॥ तदंतरेपि षष्ट्यंते
क्षयवृद्धी अहर्निशोः ॥ परीतो विपरीतोयं भगोलः परिवर्त्तते ॥ ऊने भूवृत्तपादे तु द्विज्यापक्र
मयोजनैः ॥ धनुर्मृगस्थः सविता देवभागे न दृश्यते ॥ तथा चासुरभागेपि मिथुने कर्कटे स्थि
तः ॥ नष्टछाया महीवृत्तपादे दर्शनमादिशेत् ॥ ६५॥ एकज्यापक्रमानीते ७०३ योजनैः परिव
र्जयेत् ॥ भूमिकक्षाचतुर्थांशे व्यक्षाच्छेषैस्तु योजनैः ॥ धनुर्मृगालिकुंभेषु संस्थितोर्को न दृश्य
ते ॥ देवभागे सुराणां तु वृषाद्ये भचतुष्टये ॥ मेरौ मेषादिचक्रार्द्धे देवाः पश्यंति भास्करं ॥
सकृदेवोदितं तद्वदसुराश्च तुलादिकं ॥ ६८॥ भूमंडलात्पंचदशे १५ भागे देवे तथासुरे ॥ उपरिष्टा
द्व्रजत्यर्कः सौम्ययाम्यायनांतगः ॥ तदंतरालयोश्छाया याम्योदक् संभवत्यपि ॥ मेरोरभिमुखं
याति परतः स्वविभागयोः ॥ ७०॥ भद्राश्वोपरिगः कुर्याद्भारते तूदयं रविः ॥ रात्र्यर्द्धं केतुमालेस्ते
तु कुरावस्तमनं तथा ॥ भारतादिषु सर्वेषु तद्वदेव परिभ्रमन् ॥ मध्योदयार्द्धरात्र्यस्तकालान्कु
र्यात्प्रदक्षिणं ॥ ७२॥ ध्रुवोन्नतिर्भचक्रस्य नतिर्मेरुं प्रयास्यतः ॥ निरक्षाभिमुखं याते विप
रीते नतोन्नती ॥ भचक्रं ध्रुवयोर्मध्ये आक्षिप्तं प्रवहानिलैः ॥ पर्येत्यजस्रं तन्नद्धा ग्रहक
क्षा यथाक्रमं ॥ ७४॥ सकृदुद्गतमब्दार्द्धं पश्यंत्यर्कं सुरासुराः ॥ पितरः शशिनः पक्षं स्वदि

१६५

१३

कालेनाल्पेन भगणं भुंक्ते ल्प भगणाश्रितः॥ ग्रहः कालेन महता मंडलेमहती भ्रमन्॥ स्वल्पयातु
बहून् भुंक्ते भगणं शीतदीधितिः॥ महत्याकक्ष्यया गच्छन् ततः स्वल्पं शनैश्चरः॥७८॥ नभ
श्चराणां विवरं तुल्यं महदयोपरि॥ तद्वत्से मां क्रमासर्गान् दृष्टे भगणवर्तिते॥ मंदाद्धः क्रमेण
स्युश्चतुर्थो दिवसाधिपाः॥ वर्षाधिपतयस्तद्वत् तृतीयाः परिकीर्तिताः॥ ऊर्ध्वे क्रमेण शशिनो
मासानामधिपाः स्मृताः॥ होरेशाः सूर्यतनयादधोधः क्रमशः स्थिताः॥८०॥ भवेद्भकक्षा तीक्ष्णांशो
तिग्मांशो भ्रमणं षष्टिताडितं॥ सर्वोपरिष्टा भ्रमति योजनैस्तैर्भमंडलं॥ कल्पोक्तचंद्रभ
गणा गुणिता शशिकक्षया॥ आकाशकक्षा सा ज्ञेया करव्याप्तिस्तथा रवेः॥ सैवेयं कल्पभगणे
र्भक्ता तद्भ्रमणं भवेत्॥ कुवासरैर्विभज्याप्तास्सर्वेषां प्राग्गतिः स्मृता॥ भुक्तियोजनसंख्येंदो
र्भ्रमणं संगुणा॥ स्वकक्षाप्ता तु सा तस्य तिथ्याप्ता गतिलिप्तिका॥८५॥ कक्षा भूकर्णगुणिता
महीमंडलभाजिता॥ तत्कर्णा भूमिकर्णेना यद्वा ग्रहस्फुटीकृता॥ खत्रयाः सिद्धदहना
कक्षा तु हिमदीधितेः॥ ३२४०००॥ ज्ञशीघ्रस्याथ षड्नन्दिकृताभ्रत्र्येवसप्तथा १०४३२०९॥ शु
क्रशीघ्रस्य चाष्टाग्निरसाब्धिरसषट्यमाः २६६४६३८॥ ततोर्कबुधशुक्राणां खखार्थैक
सुरार्णवाः ४३३१५००॥ ८९॥ कुजस्याप्यंकशून्यांकषड्दैकभुजंगमाः॥ ८१४६९०९॥ चंद्रे
ज्ञोच्चस्याग्निकृताष्टाद्रिद्विवसुद्वित्र्यष्टवह्नयः॥ ३८२८४७८४॥ ९१॥ कृतं तु मुनिपंचाद्रि
गुणेंदुविषयाग्नयः गुरोः॥ ५१३७५७६४॥ स्वभानोर्वेदताकीक्ष्णाद्रिशैलार्थखकुंजराः ८०५७२८६४
पंचबाणाक्षिनागर्तुरसाद्रिकौः शनेस्ततः १२७६६८२५५॥ भानां रविखशून्यांकवसुरंध्र
करा
भ्विनः॥ २५९८९००७२॥ ९॥ खचभौमखत्रयखसागर
षट्कनागव्योमाष्टशून्ययमरूपनगाष्टचं॥ १८७१२०८०८६४००००००॥
ब्रह्माण्डसंपुटपरिभ्रमणं समंतादभ्यंतरे ग्रहकक्षे दिनकरस्यकरप्रसारः॥ ९२॥

आकाशकक्षा खषड्द्विघ्ना कल्पभूवासरोद्धृता॥ १५७७९१७८२८००॥८३ ध्रुवं गुणकमारभ्य तांतेन
हन्याद्ध्रुवं दकं॥ कक्षाभिः षष्टिनिघ्नाभिः ग्रहाणां भगणोद्धृताः॥८३॥ इति श्री सूर्यमयसंवादे
श्रीसूर्यसिद्धांते गोलाध्यायो नाम द्वादशोध्यायः॥ अथ गुह्ये शुचौ देशे स्नातः शुचिरलं
कृतः॥ संपूज्य भास्करं भक्त्या ग्रहान्भान्यथ गुह्यकान्॥१॥ पारंपर्योपदेशेन यथाज्ञानं गुरो
र्मुखात्॥ आचार्यः शिष्यबोधार्थं सर्वं प्रत्यक्षदर्शिवान्॥ भूभगोलस्य रचनां कुर्यादाश्च
र्यकारिणीं॥ अभीष्टं पृथिवीगोलं कारयित्वा तु दारुणा॥२॥ दंडं तन्मध्यगं मेरोरुभयत्र
विनिर्गतं॥ आधारकक्षाद्वितीयं कक्षां वैषुवतीं तथा॥ भगणांशांगुलैः कार्या दलितैस्तिस्र एव
ताः॥ स्वाहोरात्रार्द्धकर्णैश्च तत्प्रमाणानुमानतः॥४॥ क्रांतिविक्षेपभागैश्च दलितैर्दक्षिणोत्तरैः॥
स्वैः स्वैरपक्रमैस्तिस्रो मेषादीनामपक्रमात्॥ कक्षाः प्रकल्पयेत्ताश्च कर्कादीनां विपर्ययात्॥ त
द्वत्तिस्रस्तु तौलादीनां मृगादीनां विलोमतः॥ याम्यगोलाश्रिताः कार्याः कक्षाधारद्वयोरपि॥ या
म्योदग्गोलसंस्थानां भानामभिजितस्तथा॥ सप्तर्षीणामगस्त्यस्य ब्रह्मादीनां प्रकल्पयेत्॥
मध्ये वैषुवती कक्षा सर्वासामेव संस्थिता॥९॥ तदाधारयुतौ भार्द्धे अयने विषुवद्द्वये॥ वि
षुवत्स्थो नतो भागैः स्फुटैर्भगणसंचरात्॥ छेद्याप्येवमजादीनां तिर्यक्ज्याभिः प्रकल्पयेत्॥
अयनाद्यनतं चैवं कक्षा तिर्यक्स्थिता परा॥ क्रांतिसंज्ञा तया सूर्यः सदा पर्येति भासयन्॥ चंद्रा
द्याश्च स्वकैः पातैरपमंडलमाश्रितैः॥१२॥ ततोऽपकृष्टा दृश्यंते विक्षेपांते स्वपक्रमात्॥
उदयक्षितिजे लग्नमस्तं गच्छंत्तत्तद्वशात्॥ लंकोदयैर्यथा सिद्धं खमध्योपरि मध्यगं॥ म
मध्यक्षितिजयोर्मध्ये या ज्यासा प्राभिधीयते॥ ज्ञेया चरदलज्या च विषुवक्षितिजांतरे॥ कृ
त्वोपरि स्वकं स्थानं मध्ये क्षितिजमंडलं॥१५॥ वस्त्रछन्नं बहिश्चापि लोकालोकेन वेष्टितं॥

अमृतस्रावयोगेन कालभ्रमणसाधनं॥ गुणबीजसमायुक्तं गोलयंत्रं प्रसाधयेत्॥ गोप्यमेतत्प्रकाशोक्तं सर्वगम्यं भवेदिह॥१७॥ तस्मा
द्गुरूपदेशेन रचयेद्गोलमुत्तमं॥ युगे युगे समुच्छिन्नार स चयेयं विवस्वतः॥१८॥

प्रसादात्कस्यचिद्भूयः प्रादुर्भवति कालतः॥ कालसंसाधनार्थाय तथा यंत्राणि साधयेत्॥१९॥ एका
कीयोजये। द्वीजं यंत्रं विस्मयकारिणि॥ शंकुयष्टिधनुश्चक्रैः छायायंत्रैरनेकधा॥ गुरुपदेशा
द्विज्ञेयं कालज्ञानमतंद्रितैः॥ तोययंत्रकपालाद्यैः मयूरनरवानरैः॥ ससूत्रवेणुगर्भैश्च सम्यक्
कालं प्रसाधयेत्॥ पारदाराणि सूत्राणि शुल्बतैलजलानि च॥२२॥ बीजानि पांसवस्तेषां प्रयोगा
श्चातिदुर्लभाः॥ ताम्रपात्रमधःछिद्रं न्यस्तं कुंडेऽमलांभसि॥ षष्टिर्मज्जत्यहोरात्रे स्फुटं यंत्रकपालकं॥
नरयंत्रं तथा साधु दिवा च विमले रवौ॥ छायासंसाधनैः प्रोक्तं कालसाधनमुत्तमं॥ ग्रहनक्षत्र
चरितं ज्ञात्वा गोलं च तत्त्वतः॥ ग्रहलोकमवाप्नोति पर्यायेणात्मवान्नरः॥२५॥ इति श्री सूर्यसि
द्धांते ज्योतिषोपनिषदध्यायस्त्रयोदशः॥ ब्राह्मं दैवं तथा पित्र्यं प्राजापत्यं गुरोस्तथा॥ सौरं च सा
वनं चांद्रमार्क्षं मानानि वै नव॥१॥ चतुर्भिर्व्यवहारोत्र सौरचांद्रर्क्षसावनैः॥ बार्हस्पत्येन षष्ट्य
ब्दं ज्ञेयं नान्यैस्तु नित्यशः॥ सौरेण द्युनिशोर्मानं षडशीतिमुखानि च॥ अयनं विषुवं चैव
संक्रांतेः पुण्यकालता॥३॥ भचक्रपरिवर्तेन भानोर्दैवसुरद्विषां॥ अहोरात्रं कुताद्दीनां संख्याज्ञेयाययो
दितः॥ तुलादिषडशीत्यान्हां षडशीतिमुखं क्रमात्॥ तच्चतुष्टयमेवं स्याद्द्विस्वभावेषु राशिषु॥ ष
ड्विंशे धनुषो भागे द्वाविंशेनिमिषस्य च॥ मिथुने चाष्टदशे भागे कन्यायास्तु चतुर्दशे॥ ततः शेषाणि
कन्यायायान्यहानितु षोडश॥ क्रतुभिस्तानि तुल्यानि पितॄणां दत्तमक्षयं॥७॥ भचक्रनाभौवि
षुवद्द्वितयं समसूत्रगं॥ अयनद्वितयं चैव चतस्रः प्रथितास्तु ताः॥ तदंतरेषु संक्रांति द्वितयं द्वितयं
पुनः॥ नैरंतर्यात्तु संक्रांतेर्ज्ञेयं विष्णुपदद्वयं॥ भानोर्मकरसंक्रांतेः षण्मासा उत्तरायणं॥ कर्का
देस्तु तथैव स्यात् षण्मासा दक्षिणायनं॥१०॥

द्विराशिमानान्तु ता वसंतो पि शिशिरादयः॥ मेषादयो द्वा
दशैते मासास्तेरेव वत्सरः॥ अर्कमानकलाषष्ट्या

गुणिता भुक्ति भाजिता॥ तद्धैदेनाड्यः संक्रांतेरर्वाक्पुण्यं तथापरे॥ अर्कोद्विनि
निसृतः [illegible] घा य इ र इः राशी॥ त[illegible]स्मान्मंदरौस्तु ज्ञेया द्वादशगभस्तिथिः॥१२

सू॰सि॰
॥९॥
॥१५॥

तिथिः करणमुद्वाहं क्षौरं सर्वक्रियास्तथा ॥ व्रतोपवासयात्रायां क्रियाश्चान्द्रेण गृह्यते ॥१४॥ त्रि
शता तिथिभिर्मासश्चान्द्रः पित्र्यमहः स्मृतं ॥ निशा च मासपक्षान्ते तयोर्मध्ये विभागतः ॥ भच
क्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते ॥ नाक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वान्तयोगतः ॥ कार्तिकादि
षु मासेषु कृत्तिकादि द्वयं द्वयं ॥ अन्त्योपान्त्यौ पंचमश्च त्रिधा मासत्रयं स्मृतम् ॥ वै
शाखादिषु कृष्णे च योगः पंचदशे तिथौ ॥ कार्तिकादीनि वर्षाणि गुरोरस्तोदयात्तथा ॥१८॥ उद
यादुदयं भानोः सावनं तत्प्रकीर्तितं ॥ सावनानि स्युरेतेषां यज्ञकालविधिस्तु तैः ॥ सूतकादि
परिच्छेदो दिनमासाब्दपास्तथा ॥ मध्यमा ग्रहभुक्तिश्च सावनेनैव गृह्यते ॥ सुरासुराणाम
न्योन्यमहोरात्रं विपर्ययात् ॥ यत्प्रोक्तं तद्भवेद्दिव्यं भानोर्भगणपूरणात् ॥२१॥ मन्वंतरव्य
वस्था च प्राजापत्यमुदाहृतं ॥ न तत्र द्युनिशोर्भेदो ब्राह्मः कल्पः प्रकीर्तितः ॥ एतत्ते
सर्वमाख्यातं रहस्यं परमाद्भुतं ॥ ब्रह्मैतत्परमं पुण्यं सर्वपापप्रणाशनं ॥२३॥ दिव्यं चार्क्षं ग्र
हर्क्षाणां दर्शितं ज्ञानमुत्तमं ॥ विज्ञायार्कादिलोकेषु स्थानं प्राप्नोति शाश्वतं ॥ इत्युक्त्वा मय
यमामंत्र्य सम्यक्तेनाभिपूजितः ॥ दिवमाचक्रमेऽर्कांशः प्रविवेश स्वमंडलं ॥२५॥ मयोऽथ
दिव्यं तज्ज्ञानं ज्ञात्वा साक्षाद्विवस्वतः ॥ कृतकृत्यमिवात्मानं मेने निर्धूतकल्मषं ॥ ज्ञात्वा त
मृषयः सर्वे सूर्याल्लब्धवरं मयं ॥ परिवव्रुरुपेत्याथ ज्ञानं पप्रच्छुरादरात् ॥ स तेभ्यः
प्रददौ प्रीतो ग्रहाणां चरितं महत् ॥ अत्यद्भुततमं लोके रहस्यं ब्रह्मसंमितं ॥२८॥ इति
श्रीसूर्यमयसंवादे श्रीसूर्यसिद्धांते मानकथनं नाम चतुर्दशोऽध्यायः ॥ ॐ बराउ करोपा
रख्या गोविंदेन स्वचा हुना ॥ हांसकगोत्रे दुराके लिखितं पुस्तकं स्वकं ॥ शाके १७८५ ॥

नमो भगवते वासुदेवाय ॥ ॐ नमः । राउक करोपा रख्या गोविंदेन स्वचा हुना ॥ हांसकगोत्रे दुराके लिखितं पुस्तकं मया ॥
॥१५॥